## ।। अथ चतुः पंचाशत्तमोऽध्यायः ।। Chapter-54

वसिष्ठ उवाच ततो गच्छेन्नृपश्रेष्ठ भूर्भुवं तीर्थमुत्तमम् ।।
यत्र पूर्वं तपस्तेपे मृकण्डः सुमहातपाः ।। १

मांधातोवाच :- कथं पुरा तपस्तेपे मृकण्डो मुनिसत्तमः ।।
आसीच्च भूर्भुवो देवः कथं तत्र तपोधन ।। २

वसिष्ठ उवाच :- भूर्भुवं कामिकं लिंगमस्ति सौगन्धिके गिरौ[1] ।।
सेव्यते येन कामेन तं प्रयच्छति शंकरः ।। ३

मृकण्डो नाम विप्रर्षिस्तपस्वी जरयान्वितः ।।
अनपत्यतया: दुःखी श्रीमालं क्षेत्रमागतः ।। ४

द्दृष्ट्वा भूर्भुवं देवं गिरिमारोढुमक्षमः ।।
ततः श्रीमालमाश्रित्य भूर्भुवं थी दृष्टुमुद्यतः[2] ।। ५

तपसाराधयिष्येहं भूर्भुवं कामदं नृणाम् ।।
सर्ववेदं विदं पुत्रं स मे तुष्टः प्रदास्यति ।। ६

-०-

१ ए को

२ ए दृष्टु

इति कृत्वा मतिं विप्रः पत्न्या सह तपोनिधिः ।।
प्रतिष्ठाप्य शुभं लिंगं तत्र विन्यस्य भूर्भुवम् ।। ७

प्रसादयितुमारेभे मृकण्डः सहभार्यया ।।
पुष्पैर्धूपैस्तथा गन्धैर्नैवेद्यैर्विविधैरपि ।। ८

स्तोत्रैर्नामैर्महाजाप्यैः शिवं पर्यचरच्चिरम् ।।
त्रयोविंशे[1] तदा प्राप्ते वर्षे तस्य तपस्यतः ।। ९

प्रादुरासीन्महादेवः शूलपाणिर्वृषध्वजः ।।
उवाचाथ तपोनिष्ठं मुनिं पत्न्यासमन्वितम्[2] ।। १०

विना पुत्रं विषीदन्तं पक्षहीनं यथा खगम् ।। ११

देवदेव उवाच :- यदर्थं तप्यते ब्रह्मन् त्वया नियतचेतसा ।।
सोऽहं कामप्रदो नृणां प्राप्तो लोचनगोचरम्[3] ।। १२

पुत्रस्ते भविता विप्र दीर्घजीवी महातपाः ।।
शुचिर्ब्रह्मविदां श्रेष्ठः पुनर्ब्रूहि यदिच्छसि ।। १३

-o-

१ ए त्रयोविंशतिमे
२ ए तः
३ ए गोपुरम्

मृकण्ड उवाच :- नमस्तेऽस्तु जगन्नाथ प्रथमाधिप शंकर ।।
वरेण्य वरदाघौघनाशिने शंभवे नमः ।। १४

प्रसादात्तव देवेश पुत्रो मे भविता ध्रुवम् ।।
स्थितिमत्र कुरुष्व त्वं महादिव्ये यथा गिरौ ।। १५

वशिष्ठ उवाच :- एवमुक्तवतस्तस्य मृकंडस्य महात्मनः ।।
पुरस्तादवटं भित्वा प्रादुर्भूता महेश्वरी ।। १६

तेजोभिरभितो दीप्तैः दिशो धवलयन्निव ।।
विप्रर्षिं तमुवाचेदं शिवा स्मितमुखी तदा ।। १७

देव्युवाच :- वरं वरय विप्रर्षे यस्ते मनसि संगतम् ।।
दास्यामि परितुष्टाहं नात्र कार्या विचारणा ।।। १८

मृकण्ड उवाच :- स्थितिरस्तु तवात्रापि प्रसन्ना यदि चेन्मयि ।।
कामदा भव भक्तेभ्यो देवी तुष्टा यथा गिरौ ।। १९

-०-

देव्युवाच :- उदस्यामवटं भित्वा कृपयाऽहं तव द्विज ।।
ततोऽ वटेश्वरी नाम भक्ता भुवि विश्रुतम् ।। २०

भूर्भुवं पूजयित्वा ये[1] पूजयिष्यन्ति मामिह ।।
वांछितानि प्रदास्यामि तेभ्योहं मात्र संशय: ।। २१

[2]अवटा दुत्थिता यस्मात्तत्कुण्डश्च बहूदक: ।।
लोके सिद्धिप्रदो नृणां मत्प्रसादाद्भविष्यति ।। २२

अवट उवाच :- यो त्र कुण्डे नर: स्नात्वा लिंगमेतदनुत्तमम् ।।
[3]पूजयिथीष्य ति तस्याहं[5] दास्यामि मनसेप्सितान् ।। २३

उमामहेश्वराभ्यां वैं यो वस्त्राणि प्रदास्यति ।।
स वसेद्धि चिरं[4] कालं मम लोके न संशय: ।। २४

वशिष्ठ उवाच :- इत्युक्त्वान्तर्हितो देव: सा च देवी शिवप्रिया ।।
मृकन्डोपि मुनिस्तत्र चिरं पुत्रेच्छया स्थित: ।। २५

-०-

१ बी तु

३ बी तस्याहं

४ बी सवत्स्यति चिरंकाल ममलोके शी ई सवत्स्यति चिरंकामं

२ ए अवाठाउथीए स्य

प्रसादाद्भुवस्य मार्कण्डेयो महातपाः ॥
मुनिः कल्पायुरार्थस्य मृकण्डस्य भुवि श्रुतः ॥ २६

इति ते कथितं राजन् माहात्म्यं भूर्भुवस्य च ॥
यच्छ्रुत्वा मानवो भक्त्या न पापैर्बाध्यते क्वचित् ॥ २७

–०–

इति श्री स्कन्द पुराणे श्रीमालमाहात्म्ये भूर्भुवमाहात्म्यन्नाम चतुः पञ्चाशत्तमोध्यायः ॥ ५४ ॥